Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# अक्षद्यूसमास तन्छेषपक्ष सम्पादनम्



डॉ. जगदीश प्रसाद जाटः
(वैयाकरणशास्त्र विशारदः) प्राचार्य,
गुरुकुल शिक्षा समिति, मौजमाबाद ,
जयपुर, राजस्थान, भारत।

**सारांशः**– अथ संज्ञापरिभाषादिव विवक्षाभावेप्येकशेषो द्विर्वचनेऽपीतिवत् । भाष्यानिर्दिष्ठकल्पनापराहतत्वादुपेक्षणीय एवायं पक्षः। अयं तर्हि दोषः आ सर्वनाम्नः इत्यातं युष्माद्यगित्यादावेव स्यादिक्परिभाषोपस्थितेः । न भव इगित्यादौ न चैवं सनामग्रहणमनर्थकम् । विश्वज्ञदेवयोश्चेत्युत्तरार्थत्वात् । इति तच्च यावति विंदु लीवोः अधि करणे तावत्त्वे चेत्यादि निर्देशादिहे क्परिभाषा नुपस्थितेपिनादन्त्यस्येत्यनिक एवात्व विज्ञानात् ।

**मुख्यशब्दः**– अक्षद्यूसमास, तन्छेषपक्ष, सम्पादनम्

**अक्षद्यू इत्यत्र समास विचारः सम्पादनम् ।** न चाक्षयूरित्यकारान्तोऽस्ति व्यवच्छेद्यः। नाप्याचार क्विबिति दिविति प्रातिपदिकं चूरित्येतद् व्यवच्छेद्य प्रियदिवमाचष्टे प्रियत इति चेति वाच्यम् । उगिदचामित्यतोऽधातोरित्यनुवृत्यापि तत्सिद्धेः। न चैवं नपुंसकस्य[1] झलचः[2] इत्यत्रापि सम्बन्धात्काएतंक्षिककुजानीत्यत्र नुमो प्रसङ्ग इति शक्यम् ।

सम्बन्धानुवृत्यमण्डूकप्लुतिन्यायेन वा तद् सम्बन्धोपपत्तेः। अस्तु वा विशेषणत्वं तथापि चान्तस्य दिव उदुच्यमानमौत्वमनिर्दिष्टस्यैकत्वादिक एक स्यात् । अथापरोऽपि वकारः प्रश्लिष्यते तेन चान्तस्य दिवो वकारस्यौत्वमित्युच्येत । न चैवमस्याप्युत्वप्रसंगः लाक्षणिकत्वादिति चेत् । हन्तैवमप्यप्रामाणिकगौरवापत्तिः । यतो दिवो वस्य सावुच्यमानमौत्वमत्वकारान्तेन प्रसज्येत इति चान्तस्येति विशेषणप्रक्षेपोऽनर्थको निष्प्रमाणश्च ।।

ननु षष्ठी समासे उत्वप्राप्ते कर्मधारय आश्रीयत इति चेन्न। असामर्थ्य समासस्याश्रयणयोगात्। तदुक्तम् । समासः इति सामर्थ्य तच्चापीष्टं विशेषणे विशेषणं व्यवछेद्य ज्योतिष्टो मेव नास्ति तदिति। किञ्च द्यौश्चासौ व् चेत्यपि कर्मधारये उत्वं स्यादेव कृताकृतप्रसंगित्वेन नित्यत्वात् ।

तद्विकृतेऽपि सुप्लुकि प्राप्तोसकृतेऽपि सावपि पदं भवतीति भाष्यकारोक्तेः औत्वं तु तद् बाधितुमुत्सहतेऽनित्यत्वात्। तद् विकृते सुप्लुकि न प्राप्नोति सुपरत्वाभावात् । यत्र हि लुक् नास्ति द्यौरित्यादौ तत्रोभयोरपि नित्यत्वे न परत्वादौत्वेनोत्वं बाध्यते। यदपि ध्रुवः स्थान

इत्यस्य समर्थनार्थमुक्तम्। नडिङसम्बुद्धयोरिति[3] ज्ञापकम्। तदसत्। आर्धधातुक इतिवत् सतिसप्तम्याप्युपपत्तेः न लुमतेतिः[4] निषेधविरोधेन परसप्तमीत्वबाधात् सङिसंबुध्योर्यो नकार इति विशेषणे अनुवादे परिभाषानुपस्थानात्। क्ङितीतिवत्। ज्ञापने फलमपि नास्ति। ध्रुवः स्थान इति प्रयोगस्यान्यथाप्युपपादितत्वात्। अनिष्टेवापद्येत। प्रावृट्शरत्कालादेवांत इत्यादावप्यन्तर्वतिन्यो षष्ठ्यो लुकः प्रागेवपदकार्यस्योत्वस्य प्रसङ्गत्। तथा दिवीश इत्यत्राप्युत्वेरिति तन्न। एकपदाश्रयत्वेनान्तरङे पूर्वस्य यणि कर्तव्ये परयणश्चिणो लुक् न्यायेनासिद्धत्वेन विप्रतिषेधयोगात्। किं यणि च ईश इति प्रसङ्गात्। यत्तु केचित्। अस्त्वत्रोत्वंतस्य शब्दविप्रतिषेधादीकारे यणि कृते दिवीश इति सिद्धेरयमन्यथा वृक्ष प्लक्ष अयमित्यादाचादौ सवर्णे दी? न स्यात्। अस्तु वा पूर्वपरस्य यण् तस्याचः परस्मिन्निति स्थानिवत्वात्व्यामृष्येतिवत्पुनर्यण् प्रसज्येतेति दिवीश इति नासिध्येत्। स्यादेतत् समानविषयत्वात् ज्ञापकस्य यत्र भसंज्ञाविषये सुप्लुकि कृते व्यञ्जनलोपो भावी तत्रैव लुकः पूर्व पदकार्यं ज्ञाप्यते दिवीश इत्यत्र तु न तथा संभवति वल् परत्वाभावादिति नोत्वप्रसङ्ग इति। तदप्यसत्। घूर्णदित्यत्रापि तदप्रवृत्यापत्तेः। कर्तृकर्मणोः कृतीति[5] षष्ठ्यन्तेन[6] समासात्।

न च यत्र लुकोऽनन्तरवर्णविकारो लोपो वा प्रसृजति तद्विषयत्वं कल्पनीयं अस्ति चेहसवर्णदीर्घ प्रवृत्तिरिति वाच्यम्। दिवीश इत्यत्रापि पुनर्यणः संभवात्। अथ वर्णे एव उदिति नियम आरभ्यते। यद्वा दिवीश इतीयं हलदन्तादित्य लुक समाससंज्ञेति समाधीयेत। तथापि नियमस्तावदारब्धः असंज्ञायां च दिवीश इत्यनिष्टापत्तिर्दुरूद्धता। तदास्तं तावत्स्वगोत्रक हलः वलीति द्विवकारप्रश्लेषाद् वलोपेनोत्वं बाध्यत् इति तावत्सिद्धेः। यद् वा दिव औदित्यत्र[7] दिवो वकार: प्रश्लेक्ष्यते। अविभक्तिकः षष्ठ्यर्थे वा नाभिनभं चेतिवत्। तेन दिवो वकार औत्वमापद्यत इत्यर्थो भविष्यति। वलि लोपाच्च वस्याश्रवणं यथोच्यते संवपूयादिः करिष्यते। तेन वस्य संज्ञेति।

न चैवं चान्तस्य दिव इति विशेषण प्रसंगः व्यावर्त्यसंभवेन व्यधिकरकरणाच्च यस्यैव न्याय्यत्वादथवा लौकिकार्थवतो दिवशब्दस्येदमनुकरणं दिविति तत्रानु कार्यानु करणयोरभेदविवक्षाया भो दनिबंधनस्य प्रतिपाद्यत प्रतिपादकभावस्याभावादर्थवद् व्यपदेशाभावात् सुबुत्पत्तावपदत्वादसत्युत्वे वलि लोपे च दिव इति निर्देशोपपत्तिः।

यत्तु नव्याः दिवित्यस्य पदत्वे पदान्तरसम्बन्धासम्भवाद् वाक्यार्थस्यैवानुपपत्तिरिति। तदविचार चतुरं गवित्ययमाह:- अ इ उ णित्यादिष्वपि दुरूत्तरत्वात्[8]। अपदयोरपि प्रकृतिप्रत्यययोः संसर्गबोधकत्वात्। अर्थाध्याहारवादिभिरपदार्थेनापि पदार्थसंसर्गस्वीकाराच्चेति।

न चापदत्वे प्रयोगानुपपत्तिः तस्य वृत्तिमात्रपदविषयत्वात्। यत्तु भाष्येव वलोपः प्रत्यास्थातः इति वलि लोपानुपपत्तिरिति[9]। तन्न सम्भवत्यस्यात्रैव प्रयोजने प्रत्याख्यानस्यैवायुक्तत्वात्। दिदिव उदेति अस्त्रे प्रमाणं जीरदानुरित्यादि प्रयोजनानां सतिसम्भवे छान्दसत्वेन अगतिकगतिना प्रत्याख्यान सति निवेशमात्रं तर्कं व्युत्पादनपरं। ननु तात्विकं कथमन्यथाऽतोऽलोन्त्यस्येत्यत्र[10] लुप्तनिर्दिष्टो वकारः लोपो व्योर्वलीति भाष्यैकपदौ[11] संगच्छेयाताम्। यत्तूक्तम्। नात्र व्योर्वलीति लोपः किं तर्हि[12] लकारचकारयोः द्वन्द्वे संयोगान्तस्येति[6] लुप्त इति। तदसत्। यणः प्रतिषेधो वाच्य इति निषेधात्।

न चैतद् वचनं किन्त्वसिद्ध परिभाषासिद्धोऽयमों दध्यत्रेत्यादिविषय इति वाच्यम्। अविशेषश्रुतनिषेधस्य[13] विशेषविषयत्वकल्पने प्रमाणाभावात्। तथा च भाष्यकारो झलो झलीत्यतो [14,15] झल् ग्रहणं पुरस्तादपकृष्य संयोगान्तस्य झलोलोप इति सूत्रार्थं व्याख्याय यणः

प्रतिषेध इत्यस्यान्यथा सिद्धिमाह। एवं हि वदन्न कृत्रिमस्यापि यणो लोपं नानुमेने। यस्तु तत्र बहिरंगलक्षण: प्रतिषेध इत्यस्यान्यथा सिद्धिमाह । एवं हि वदन्न कृत्वा द्वेति द्वितीयः परिहार उक्तः स दध्यत्रेत्याहि प्रकृतोदाहरणमात्रपरतयाप्यविरूद्ध इति न तदवष्टम्भेन कृत्रिमस्य यणो लोप इष्टो भगवत् इति कल्पनोचिता पूर्वपरिहारविरोधात् । अत एव कातन्त्रपरिशिष्टे उक्तम् । भाष्ये तु संयोगान्तलोपे झलो लोपो नास्तीति समर्थितमिति।

अत एव युष्मदो[16] मान्तस्य युष्मभ्यं युष्मासु[17] इत्युदाहृतम्। सान्तापेक्षया शेष इति वादिनां शेषे लोपो नास्ति तस्मात् लुप्तनिर्दिष्ट इति वलिलोप एवोक्तः संज्ञापरिभाषादिवदि हैवोपयोगसंभवाच्च। तावत्प्रत्याख्यानं स्थितमित्याशयात।

तदेवं व्योर्वलि इति वप्रश्लेष सामर्थ्याद दिव इति निर्देशे उत्वाभाव इति सूक्तम् । अथवा मा भूद् व प्रश्लेषः अर्थवद्ग्रहणपरिभाषयोत्वं न भविष्यति।

न च स्वरूपमेवार्थोऽस्तीति वाच्यम् । तादृगर्थवत्वा सर्वत्रसत्वेन परिभाषाया निर्विषयत्वापत्तेः । यत्पुनरेतद् द्वन्द्वाभिधानमर्थवत्परिभाषार्थानवबोधविजृम्भितमिति स वत्वानं दूष्यते । यत्र स्वरूपेण च लौकिकेन चार्थवत्वं नास्ति तदेव परिभाषाया व्यवच्छेद्यं यथा दाधाध्वदापित्यत्र[18] धातुगतिश्च[19] दा धा इति धात्वेकदेशयोः । यथावकाशे कुश इत्येकदेशस्य शे शब्दस्य पुनरनुकरणस्यापि । अन्यथा धुप्रागद्युभ्य इत्याद्यनुकरणेऽप्युत्वे न स्यादिति तन्न। अयं हि तेषामाशयः। अस्तु नामानुकरणमनुकार्येणार्थवत्।

न चानुकरणं कार्यितया निर्दिश्यतेशब्दं तु अनुकार्यप्रायौगिकम् । अर्थवत्परिभाषापि[20]तस्यैवार्थवत्तां विधत्ते अर्थवत्वं च नोपलक्षणं धात्वेकदेशेति प्रसंगात्। कयाचित् व्युत्पत्या प्रयोगान्तरेवार्थवत्तादर्शनेन तस्यापि अर्थवद् दाधा जातीयत्वात्। किन्तु विशेषणं तेन यत्र अनुकरणेऽनुकार्यवत्तया विवक्षितं तदनुकार्यं ग्राह्यमित्युक्तम् न वति।

ततश्च धुप्रागित्यादौ यत्र स्वर्गाद्यर्थोपहितं दिव शब्दरूपमनुक्रियते क्रियत एव तत्रोत्वं । इहत्वानाश्रितार्थशब्दस्वरूप-वर्णानुपूर्वमात्रमनुक्रियते। दिव औदिति तेनात्रोत्वाभावः । दृष्टं चानुकरणे वैधं अर्थोपहितानुकरणं रूपमात्रानुकरणञ्चेति। आद्यं यथा परिव्य वेभ्यः क्रियः, क्षियो दीर्घा दिति । अत्र हि क्रियावाचित्वोपहितस्यानुकार्यस्य विवक्षितत्वेन धातुत्वात्तदनुकरणस्यापि प्रकृतिवदनुकरणमिति धातुत्वात्तान्निबन्धन इयड्. भवति। विपराभ्यां जेः[21] हेरचङीत्यादौ[22]त्वनाश्रितार्थस्य स्वरूपमात्रस्यानुकार्यत्वेन विवक्षितत्वेन धातुत्वात् तदनुकरणेप्यादेशिकस्य तस्याभावादियङ् भावः ।

न चातिप्रसंगः उपसर्गाभ्यासलकारसमभिव्याहारेण धातोरेव लाभात् । दिव औदित्यत्राप्याधिकारात् साविति वचनाच्चार्थवत् एवौत्वं पर्यवसास्यति । अवश्यं चार्थवदनर्थकानुकरणत्वविवक्षाभेदेनैव प्रयोगानिर्वाह्याः। कथमन्यथा महत्पूर्वाजातिरित्यत्रान्महत[23] इत्यात्वं न स्यात् । तदुक्तं कैयटेन । अमहत्पूर्वेत्यत्र महत्शब्दस्यानुकरणशब्दत्वलौकिकार्थाभिधायित्वाभावादात्वाभाव इति।

किञ्च युष्मद्युपपदे अस्मद्युत्तमः[24] युष्मदस्मदोः षष्ठीत्यादौ त्वमादयो न स्युः एकाच्चद्याचांद्वेस्तीयः किमः संख्यापरिमाणे इति च। उभादुदात्तो नित्यमित्यादौ विभक्तिकार्ये च समासादितः स्यात् । अथ तत्र लौकिकार्थवत्तां ग्रहणं । तन्न ही दृग्वच नमस्ति । अर्थवत्परिभाषा फलं चेन्न । स्वरूपेणाप्यर्थवत्वानपायात् । न च स्वरूपार्थानां न भवतीत्यपि नियमः । धुप्रागित्यादेः अक्षणोऽदर्शनात् यथा

विभाषेत्यादेर्निर्देशस्य दर्शनात् । तस्मादस्मदुक्तैव सिद्धान्तपद्धतिर्गति। सिद्धमेतत् वकारप्रश्लेषण निर्दिष्टस्थानिकत्वाद् दिव औदिको न भविष्यतीति। अन्ये त्वाहुः । इतोदितीत्ग्रहणं ज्ञापकमिहप्रकरणे स्वसंज्ञया अविधाने चानेकपरिभाषा व्याप्रियत इति । अन्यथा नीयमानो गुणत्वादिक एव भविष्यतीति किमित् ग्रहणेनेति। ..

न च अभुक्षणि ऋदुतोर्निवृत्यर्थ रित् ग्रहणं । यतः इक् परिभाषायामिक्ग्रहणं सर्वनामस्थानपरत्वेन विशेषयिष्यामः। ततश्च येन नाव्यवधानन्याये नैकवर्णव्यवहितस्येति एव भविष्यसि न ऋदुतोरिति यद् वा पदेन भस्य टॅलोप[25] इति टिग्रहणं तत्पुरस्तादपक्रक्ष्यते तेनेकं विशेषयिष्याम।

पथ्यादीनां टेरिक इति तेनेत एव भविष्यति ऋदुतोः । एवमपि ऋभुक्षयतेः क्विपि[26]ऋभुज् ऋभुक्षौ ऋभुक्ष इत्यत्रस्यात्।

पुनस्तमाचष्ट इति द्वितीयेणौक्वौटिलोपे च कृते ऋभौक्ष्यत ऋकारस्यापि स्यात् । तथा पन्थानमिच्छति पथीयति ततः क्विप्यल्लोपयोः पथीः पथ्यौ पथ्य इत्यत्र दीर्घस्येतोत्वं माभूदितीत् ग्रहणं स्यात् । न च पथ्याद्यर्थप्राधान्य एवेति नियमः । सुपन्थाः ग्राम: सुपन्थानि वनानीत्यत्राप्यप्रसक्तेः ।

न च णिलोपस्य स्थानिवत्वं क्वौ लुप्तत्वादिति चेत् । मैवं क्वौ विधि प्रति न स्थानिवन्न तु क्वौ लुप्तम्। अन्यथात्वमाचक्षाणो लौरित्यत्रोट् न स्यात् । योसौणावतो लोपः तस्य स्थानिवत्वात् । अवश्यं चैतदिहाश्रयणीय मन्यथा इगन्तग्रहणात् कामयत्वं प्रतिक्रियेत । ततश्चेत् ग्रहणात् ज्ञापकात्पथ्यादीनामात्वं दिव औत्वं चेको न भविष्यतीति सिद्धम् ।

यत्पुनराहुः- सर्वनामस्थानेन प्रधानाप्रधानयोरमुंन्यायमनुरूध्यैकान्त रितप्रधानसंबंधा येकं विशिष्यवचननैरर्थ। को न तस्मिन्निति परिभाषैकदेशो निर्दिष्टग्रहणं श्रुतं बाधनीयं किञ्च स्मिन्निति सकलपरिभाषानुग्रहाय सर्वनामस्थानेन पथ्यादीनि विशिष्यामित्यत्र सादृश्यग्रहणानुमितलौकिकप्रधाना प्रधानन्यायानुगृहीत विशेषणविशेष्यभावो बाध्यत इति गवेषणायां प्रत्यक्षश्रुत्यविरोधेनोपपत्तौ सत्यां तद् ।

विरोधोनन्याय इति सर्वनामस्थानेन पथ्यादयो विशेष्यन्ते तथा च अकारोकारेऽकाराणां ऋभुक्षण्यत्वं प्राप्तं तन्निवृत्यर्थमित इति कृतं न ज्ञापकमिति। तदेतद व्युत्पन्नाभिधानम्।

यतः पथ्यादिविशेषणत्वं सर्वनामस्थान इत्यस्य यदि प्रागवधार्येत ततः पथ्यादेः पूर्वस्य परस्य वा व्यवहितस्य चेति संदेहे नियमार्थ तस्मिन्निति परिभाषा प्रवत् । तदेवत्व लभ्यं प्रधानाप्रधानन्यायपराहतत्वात् । यत्र येककालमुभयोपस्थितिस्तत्र बाध्यबाधक चिन्तावसरः न तूपजीव्योपजीवकयोः । अथोत्तरकालिक[27] श्रुतिबाधशंकया प्रागुपनतमपि प्रधानान्वयमुपेक्ष्याप्रधानान्वय एवाश्रीयत इत्युच्येत तन्मन्दं गुणानां च परार्थत्वादिति न्यायात्[28] । अथ निर्दिष्टश्रुत्यबाधाय गुणयोरपि सम्बन्धमाश्रीयते। तदप्याशामोदकमात्रम् ।

न हि पथ्यादिविशेषणत्वे तस्मिन्निति परिभाषाया अंशतोऽपि व्यापार: संभवति । अनुवादे परिभाषाणामनुपस्थानात्। तथा चोदीचा[29] मातः स्थान इति स्थानग्रहणं क्रियते। तत्रे कमेकदेशबाधशंकाप्रसङः । उत्पतन्नेवहन इति न्यायाद् प्रधानान्वय एवांशतोऽपि तावत्परिभाषा व्याप्रियते। लौकिकन्यायश्च बाधितो भवतीति स एव ज्यायान्।

नन्वत्र प्रधानभूतविशेषणत्वम्। न च तद्विशेषणे परत्वं परिभाषया बोध्यते सिद्धस्य विधेयत्वात् । विशेषदशायां चासिद्धेन तेन पौर्वापर्यासम्भवादिति चेत् । प्रधानाप्रधानदशायां तावर स्थानिद्वारा बुध्यततन्निरूप्यते । उत्तरकालत्वादेशेनैव साक्षात् इकोयणची[30]त्यादिषु एवमेव स्थितम् । इदमेव कृत्वोक्तं सर्वनामस्थानपरत्वेनेकं विशेषयिष्याम इति। यत्तु तदिक एव विशेषणमबाधात् । तत्रैव च तस्मिन्निति परिभाषाप्रवृत्तिः सम्भवति। इयं हि षष्ठीनिर्दिष्टस्य विशेषमाह।

अचीक:[31] स्थाने यण् भवतीत्युक्ते किं पूर्वस्य परस्य वा व्यवहितस्यानन्तरस्य वेति संदेहे उपदिश्यते पूर्वस्थानेऽन्तरस्येति तत्समानाधिकरणं चेक इत्येव न यणादिविधेयं प्रथमानिर्दिष्टत्वात् परिभाषाविधेयेन पूर्वस्येत्यनेन वैयधिकरण्यात्। प्रश्नप्रतिवचने योश्च समानाधिकरण्यस्यौत्सर्गिकत्वादिति तत्र एवं हीक इत्यस्यानुवाद्यत्वं तद्विशेषणे परिभाषा न प्रवर्तत विध्यंगभूताश्च परिभाषा द्विधावेव प्रवर्तत इति च व्याकुप्यत प्रधानेनान्वय इति बाध्येतेति। न चोद्देश्यविधेयनिमित्तानामंशभावनाकाङ्कितत्वेन विधिशरीरप्रविष्टत्वेनोद्देश्य विशेषणेऽपि नोक्त दोष इति वाच्यम् । न ह्येतावक उद्देश्यमेव तद्विशेषणत्वमपैति।

न च भावनाविधेयेनितंदशा अपि निषेधाः स्वर्गकामोयजेतेति स्वर्गस्यापि तथात्वापत्तेः । न च विध्यगतामात्रेण विधेयत्वव्यपदेशग्रतथासत्युदीचामातः स्थान इति स्थानग्रहणमनर्थ कं स्यात् । उद्देश्यविशेषणत्वेप्यु क्तरीत्या विध्यजत्वानपायात् । क्ङितीत्यस्य गुणवृद्धिविशेषणत्वेऽपि परत्वं[32] दुर्निवारं स्यात् । अस्तु चान्यत्र यथा तथा। इतोदित्यत्र तु पथ्यादीनां न कथञ्चिद् विधिसंस्पर्शोस्ति।

वस्तुतस्तु साक्षाद् विधेयो नोचितमेवानुवादपदेनेह विवक्षितं अन्ययोगत्वोरपि सिद्धविभक्तिनिर्दिष्टत्वेनानुवादत्वविशेषात्तद्विषयपरिभाषा[33] नोपतिष्ठेरन् । अयञ्चार्थो यथा ज्ञापकमवस्थाप्यो न तु न्यायाभासैरन्यथायितव्य इति । कथं तर्हि विधेयविशेषणत्वे पूर्वस्येत्यनेन संगतिः । भदैव न ह्ययमस्यार्थः सप्तम्यन्तेन विशेषितस्य पूर्वस्य भवतीति। किं तर्हि सप्तम्यन्तं निमित्तमुपादाय यद् विधीयते कार्ये तत्पूर्वस्यानन्तरस्य षष्ठीनिर्दिष्टस्य स्थाने भवतीति न किञ्चदनुपपन्नम्। यदप्युक्तमतोल्रान्तस्ये[34]त्यन्तग्रहणं लिङ्गनिर्दिष्ट श्रुत्यविरोधायप्रधानविशेषणता बाध्यत इति।

अन्यथातोल्ल इत्ये व वाच्यं रे नाङ्ग विशेषणात् तदन्तविधौल्रान्तस्याङ्गस्यातः सिध्येऽनन्तरे वृद्धिरिति वचनसामर्थ्यात् प्रत्यायने कालाव्यवधाने चाश्रितेऽन्तग्रहणोऽनर्थक: स्यादिति तन्न। अतोल् इत्युक्तौ अथवा विशेषणाददन्तस्याङ्गस्यावयवस्य लरोवृद्धिरित्यपि विज्ञायेत ततश्च चिकीर्षा अलिलिखिषीदित्यत्र प्रसंग इत्यन्तग्रहणं स्यात् ।

न चात्रापि सिचत्वस्य विशेषणादनेकान्तरेऽप्रसङः। अदन्ताअवयवस्य ल्रस्यानन्तरस्येकान्तरस्य वा सम्भवात् सम्भवे वा तद् व्यावृत्यर्थमेवानां स्यादित्यज्ञापकं किञ्च कृतेप्यन्तग्रहणेऽतः समीपौ यौल्रौ तदस्यातो यन्न तत्र तस्यापि वृद्धिरित्येतावत्युक्तेऽवारीदफलावयवेऽपि प्रसज्येत। यत्तूच्यते। सिजन्तभक्तोऽगमस्तत् ग्रहणेन गृह्यते। न तु सिचि यदङ तत् ग्रहणेनेति तन्न। द्विलकारक निर्देशादनात्वावस्थायामेवाट् भवति तत्र सिचि यंदगं सादन्तस्यायं भवत्यकार इति वृद्धिप्रसात्। अस्तु तद्यंत उपधाया

इत्युपधाग्रहणं लिङं तस्मिन्निति श्रुतनिर्दिष्टग्रहणानुग्रहीतविशेषणविशेष्यभावे । अन्यथावयवस्यातोऽनतरे गिति वृद्धि रिति वचनव्यक्तौ अन्त्यस्यातोल्लान्त्यस्येत्येव सिद्धेरनन्त्यार्थे सति वचनवलादेकालाव्यवधान आश्रितै च कामुक इत्यादावप्राप्तेरूपधाग्रहणमनर्थकं स्यात् । न च बाधकबाधनायातोन्त्यस्य णित्यनन्तर एव वृद्धयर्थमिति वाच्यम। आर्धधातुकेऽदन्तस्य ण्यत्लोपाविति पूर्वविप्रतिषेधेन सम्भवात् तद्धिते[35] तु लोपः शाकल्यस्येति[36] लिदादिवृद्धेरवश्यं भाव्यत्वेन तयैवान्त्यवृद्धे धनात् । यस्येति चेति[37] लोपबाधनार्थमपि न सम्भवतीत्युपधा ग्रहणलिमिति। तदप्यसत् । यतः घटं पटं वाआचष्ट इति णौणाविष्टवदिति प्राप्तटिलोपबाधनार्थमेतत्स्यात् । न चाचोऽभिणीति[38] वदियमपि वृद्धिटिलोपेन नित्यत्वात् बाध्यतामिति वाच्यम् ।

पुनरारम्भस्य बाधकबाधनार्थत्वसम्भवात्। किञ्च अत इत्यन्तेनाङ्गविशेष्यत। वृद्धिश्रुत्या चोपस्थितमिक इत्येतत् णितीत्यनेन ततश्चादन्तस्यास्येको ञ्णित्यनन्तरे वृद्धिरित्यर्थः स्यात् । ततश्च लोलुवक इति लोलूयते। अल्लोप[39] यत्नो ययोः कृतयोरलोपस्य स्थानिवत्वादंतरङ्गत्वात्प्राप्तमप्युवङ बाधित्वा वृद्धिरेव यथा स्यादित्येवमर्थमेतत्स्यात् । भवति ह्येतत्स्थानिवद्भावेनादन्तमङ येन नाव्यवट नन्यायेन च णित्यनन्तर इगिति कृतेऽपि वान्तरङत्वादुवङितस्य वृद्धयर्थमेतत्स्यात्। नन्वेवमादिष्टादचः पूर्वत्वेन वृद्धिविधावल्लोपस्थानिवत्वं न स्यात्तत्कथमदन्तभमिति चेतं । एवं तर्हि भूतपूर्वमदन्तत्वं ग्रहीष्यते।

अथ साम्प्रतिकमदन्तं क्वचित्सम्भवेत्तर्हि तदेवोदाहरणमस्तु । अथवा प्र यिधक इत्यादि क्यजन्तमु दाहार्य अतो लो पस्य स्थानिवत्वे चाल्द्वयव्य वधाने ऽपि भविष्यति वचनप्रामाण्यात् । तह ये के नै व व्यवधानमाश्रयणीयमिति किन्त्वन्यथानुपपत्तिः गम्योऽयमर्थः स च यावत् व्यवधानकल्पनामन्तरेण नोपपद्यते न च व्यवधानमवर्जनीयतया कल्पयति अत एव येनेत्येव सामान्येन न्यायो निबध्यते न तु व्यवधायकसंख्यो परिभाषास्मान्नोपद्या ग्रहणं ज्ञापकं प्रत्युतवव्रजेत्यत्र[40] हलन्तग्रहणं लिंग निर्दिष्टग्रहणम धमत्यैकान्तरितप्रधानसम्बन्धो विशेषणस्य । तद् विक्रियते अरांक्षीदभांक्षीदित्यादौ हल्समुदायव्यवधानेप्यचो वृद्धिर्यथा स्यादिति । अन्यथासिद्ध तत्राचो विशेषणाद्येन नाव्यवधानन्यायादपाक्षी दित्यादावेव स्यान्नत्वरांक्षीदित्यादौ यदि तु निर्दिष्ट ग्रहणविरोधाय प्रधानसम्बन्धमवमत्याप्रधानाङ्सम्बन्धः स्यात्तर्हि हलन्तमणमनर्थकं स्यात् । कथं योगविभागः करिष्यते वदव्रजोरित्येको योगः अत्र ता इति वर्तते। वदव्रजोरतो वृद्धिरित्यर्थः ततोऽच इत्यपरः । ततश्च विशेष्यते अवयवस्याच इति। न त्वचाङ अजन्तस्यास्येति। असम्भवात्। अदन्ते तावदतो लोपे न भाव्यम् । आदन्ते तु नास्ति विशेषः सत्यां वृद्धावसत्यां वा सगिड् विधानादसम्भवश्च इगन्ते तु सिचि[41] वृद्धिरित्येव सिद्धम् । एजन्ते त्वात्वेनैव भाव्यम् । अभवीदित्यत्र तु नेदाति निषेधेनेति ततश्च सिच्यनन्तरस्याम्गस्याचो यत्र तत्र स्थितस्य वृद्धिरिति सर्वमिष्टं सिद्धमित्यनर्थकं लग्रहणं ज्ञापयति।

निर्दिष्टग्रहणं बाधित्वाप्येकान्तरितप्रधानसम्बन्ध एव बलीयानिति। तत्र चासति हलन्तग्रहणे सिचानेव विशेष्येत नाङ ततश्चैकाल् व्यवाय एव स्यात् नारांक्षीदित्यादाविति हलन्तग्रहणं हल्समुदायपरिग्रहार्थमर्थवद् भवति । ततश्चेतोदित्यत्रापि सर्वनामस्थान इत्यनेनेगेव विशेषष्यते न ययादय[42] इतीत् ग्रहणमुक्तार्थज्ञापकमेव च युक्तं यदप्युक्तं गुणः कृतात्मसंस्कारः प्रधानं प्रति पद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्तत इति सर्वनामस्थाने नाउमेव कदाचित् विशेष्येतेति तदर्थमित् ग्रहणं लिमिति। तत्प्रलापमात्रं न हि

लक्षणस्यातिप्रसक्तिरूपकाराय प्रभवति तथा सति सर्वत्रैवायं न्यायो दुर्वार: स्यात् । किन्तु लक्षणस्येष्टविषये व्यवस्थापनार्थं न्यायविरूद्धोप्ययमर्थः क्वचिदाश्रीयते लक्ष्यानुरोधात्।

न तु लक्ष्यविरोधाय । न च ऋभुक्षणि ऋकारोकारयोरत्वमिति । अवश्यं चैतदेवमेषितव्यमन्यथा अल्लोपो न इत्यल्लोपोऽक्षणातक्ष्णेत्यादेरप्यकारस्य स्यात् । अनाकारविशेषणे त्वनसामनसे त्यत्रापि स्यात् । अथोभयं विशेष्यते अनन्तस्यास्यानोकारस्येति । एवमप्यनस्तक्षणमनस्तक्ष्णेत्यत्रापि स्यात् । तस्माद् भसंज्ञाक्षिप्तेन प्रत्ययेन परतया नोकारो विशेष्यते। नैकवर्णव्यवहितस्यैव भवतीत्याश्रीयते।

## तच्छेषपक्ष विचारः।

गुणः कृतात्मसंस्कार इति दर्शनेत्वस्यैव विशेषणात्प्रधानस्य विषय व्याप्तिलक्षणवदूपकारलोभात्स्यादेवादेरपि लोपः। यदप्युक्तं तच्छेषे सर्वादिशे तानि वृत्तय इत् ग्रहणं स्यादित्यलिड़मिति। तदप्यसत् । तच्छेष तदपवादपक्षो प्रतिक्षिप्य पदोपस्थापनमनेन क्रियत इति स्थिते द्यौरित्यादावतिप्रसड़निवृत्तयो स्वसंज्ञया विधानं नाप्रमत्तस्य शोभते। किञ्च तच्छेषपक्षेऽपि सर्वादेशेत् न भविष्यति थोन्थ[43] इति ज्ञापकात् । अन्ये त्वाहुः । नेह सर्वादिशता प्रसड़ः । यत् न युभयोः प्राप्तयो किं कर्तव्यमिति गवेषणायामुभयोर्विरोधोऽन्यतरसाधकं च नास्ति तत्राविशेषादुभयोर्निवृत्तौ सत्यां सर्वादेशता न चैतदस्तीक परिभाषायां हीह सत्यामित्ग्रहणवैयर्थ्यप्रसस्यान्यतरस्याधकस्य दर्शितत्वादिति तदसत् । सर्वादेशता निवृत्यर्थं बाधनं प्रतीत् ग्रहणानर्थक्यस्य प्रसञ्जयितुमयुक्तत्वात् । अनाश्रिते हीत् ग्रहणे सर्वादेशतापाद्यते न च तस्यादशायामित् ग्रहणमस्ति यस्यानर्थक्यप्रसञ्जनमापाद्येत । तस्मादित्ग्रहणं ज्ञापकमेवेति सिद्धं तदेवं दिव

वस्तुतस्तु दिव औदित्यत्रेक परिभाषोपस्थानेऽपि न दोष: कारूपसिद्धिः । उच्यतेदिव् स् इति स्थिते औत्वोत्वयोः प्रसङकृतप्रसंज्ञित्वात्पूर्वमंत्यस्योत्वम् । एकदेशविकृतस्यानन्यत्वाच्चशब्दान्तरप्राप्तिरपि[44] नास्ति। औत्वं तूत्वे कृतेऽन्तरत्वाद्यकृतः उकारस्य प्राप्नोति अकृते तूत्वे इकारस्येति शब्दान्तरस्य प्राप्तेरनित्यं वार्णादाङ बलीय इति तु नास्ति । यणौत्वयोर्व्याश्रयत्वात्। ततश्च उत्वोत्तरकालं तस्यैवोत्वे कृते सिद्धमिष्टं द्यौरिति नेदं प्रयोजनमिदं तर्हि स्यात् । पन्था इत्यात्वमिको मा भूदिति । तत्र आत् विधिसामर्थ्यात् यदि हि पथ्यादीनामाकार इक: स्यात्तदा पन्थेत्येव रूपेण भाव्येत इत्ग्रहणमात्ग्रहणं च न कुर्यात् । पथिमथ्यभुक्षामात्स[45]र्वनामस्थान इत्येव ब्रूयात् । इक् परिभाषया इकारस्यैवाकारे उपधादीर्घ च सिद्धं स्यात्पन्थेति।

न च ऋभुक्षणि अकारोकारयोरात्वविधानमर्थवत् । पथिमथिग्रहणं तूत्तरार्थ स्यादिति वाच्यम् । सर्वनामस्थानेनेको विशेषणात् । सम्बुद्धौ दीर्घश्रवणार्थयात्। विधिरिति चेत्। एवं तर्हि अविशेषेणादेव विधेय इत्यद्वचनं ज्ञापकमेव । नन्वात्वविधौ ऋभुक्षणमिदमिति प्रयोगासिद्धिः । अति तु सति वाषपूर्वस्य निगम इति दीर्घविबुधिविकल्पाश्रित्येव सिद्धमिष्टम् । न च दीर्घविकल्पविधानसामर्थ्यात्पक्षे ह्रस्वोभ्यनुज्ञास्यत इति युक्तम् । अन्येषु षपूर्वक्षादिषु विकल्पार्थत्वेनोपपत्तेरिति चेन्न।

वान्त इत्यकारविधिनापि द्वैरूप्योपपत्तेः। यत्वेव मृजीषीत्यादा विकारादेरप्यत्वप्रसड़ इति नव्याः । तदप्यसत् । किमत्रेकारो न श्रूयतेत्यापाद्यते। किञ्च कदाचिदकारोऽपि श्रूयतेति । नाद्यः । अत्वस्य विकल्पितत्वात् । नान्त्यः । यतो निगम इत्युच्यते न च तत्राकारः प्रयुज्यते न च प्रयुक्तः स्वेच्छया प्रयोजयितुं शक्यते। अनित्यत्वापत्तेः अन्यथातवाद्युपधा दीर्घोऽत्र विकल्पात्पक्षे निवर्तेत इष्टमेतदुच्यते। दृष्टानुविधिः छन्दसीति। अथ क्वचित्प्रयुक्तो भविष्यति तर्हि नेदमनिष्टपादनं दृष्टमेवैतत्संगृहीतम् ।

अव्यवस्थितविभाषेयं तेन पथे व्यवस्था भविष्यति । अथवा निगम इत्युच्यते दृष्टानुविधिश्च छन्दसि भवति तेन नातिप्रसङः । अथवा नान्तदीर्घापवादोऽयं स च मध्येऽपवादा इति सर्वनामस्थाने चेति दीर्घमेव बाध्यते तं च परत्वादित् हनिति डी? बाधिष्यते। अथवा आ अ इत्याकारस्याकारो विधास्यते। नन्वेवं बहुदेषीणि प्रियेषुणीत्यादौ दीर्घविकल्पो न सिध्येदिति चेत् । न ईदृशस्य लक्ष्यस्य कैरप्यनुदाहरणात् । अथ सर्वागमपारदृश्वनामया दीर्घाभावोप्युपस्थापयति[46] इति चेत् । तर्हि बहुलं छन्दसीति भविष्यति हस्वः यथा पूर्वस्येत्यनर्थकमिति वाच्यम् । बहुलग्रहणप्रपञ्चार्थत्वात् छान्दस सूत्राणां यद् वा द्वयमनेन विधीयते दीर्घ विकल्पो त्वच् तच्च यथादर्शन व्यवतिष्ठते। तस्मात्पथ्यादेरद्वचनं ज्ञापकं नात्वमिको भवतीति मतश्चालोन्त्यैव भविष्यति इति त्यदाद्यत्वे[47] तु निर्दोष: न इदमो म विधानसामर्थ्यात् । तदचिमस्य त्यदाद्यत्वे प्राप्ते तदपवादः क्रियते। यदि चात्वमिकः स्यान्मस्य मवचनमनर्थकं स्यात् । मो राजीति वदनुस्वारबाधनार्थो मविधिरिति चेन्न।

अनुस्वारस्यासिद्धत्वेन बाधितुमशक्यत्वात् तत्तु सपादसप्ताध्यायीस्थस्याधिकारस्य बाध्यस्यासम्भवादनुस्वारस्य सिद्धत्वज्ञापने नाप्युपपत्तिः स्यादिति चेन्न। एवं युभयं बाध्येत असिद्धत्वमनुस्वारश्चेति वदन्ति । तत्राप्येतत्समानं इक परिभाषा त्यदाद्यत्वं चेति द्वयस्य बाध्यत्वादिति तन्न । उभयबाधाविशेषेऽपि पुरः[5] स्फूर्तिकत्वेन सन्निहितप्राकरणिकेक परिभाषा त्यदाद्यत्वयोरेव बाधस्य न्याय्यत्वात् । यत्र तु सन्निहितं बाध्यं न सम्भवति तशनत्यागत्या व्यवहितमपि बोध्यते। यथातो रोरित्य[48]त्रासिद्धत्वं मोराजी[49] त्यत्रानुस्वारः। यत्र तु सन्निहितं बाध्यं न सम्भवति न लिड्गेन प्रकरणाबाधः। अविरोधेन समावेशसम्भवे बाधायोगात् । तदुच्यते प्रकृतस्येटो दीर्घत्वमिति।

न च मस्य विध्यानर्थक्यात्सर्वादेशो मास्त्विति वाच्यम् । यः सौ[50] इदमोऽयं पुंसी'त्यादि[51]ज्ञापकात्। एवं दश्चेति ज्ञापकात्त्यदाद्यत्वमपि न सर्वादेशः।

किञ्च यदीदम इकारस्यैवात्वं स्यान्नतो दश्चेत्यनुवर्त्य पुंसि नाप्यक इति सूत्रयित्वादस्य यकारनकारमात्रसम्बन्धविदध्यात्। एवं चेत् ग्रहण मादेशयोरकारोच्चारणं च न कुर्यात् । यद् वा पुंसीत्यपि न कुर्यात् यः सावित्येव सामान्य विधिनैव सिद्धः कथं तद्युक्तं पुंसीत्येव सूत्रयेदिति । सत्यम् ।

अकारान्तोच्चारयेदित्यत्र तात्पर्यात् । एवं चेकारोच्चारणं ज्ञापकं तत्त्यदाद्यत्वमिको भवतीति न तु नियमार्थमेतत्स्यात् । पुंस्येवायमिति भवति न तु स्त्रियामिति। अन्यथात्यदाद्यत्वमविशेषेणेक: स्थाने विधीयमानं स्त्रियामपि स्यात् । सत्यमथापि त्यदाद्यत्वे नाकारे यः साविति च यत्वे यमिति रूपसिद्धाविदोऽयपुंसीति वचनमनर्थकं[52] सन्नियमार्थं भवत्वथवात्यदाद्यत्वे इक् परिभाषानुपस्थितौ लिंगमिति

चिन्तायां विधिनियम[53] संभवे विधिरेव ज्यायस्त्वाल्लित्वमेवोचितं यतस्तत्र विधित्वमुपपन्नं भवति। ननु गौणेत्ययमित्यादौत्यदाद्यत्वाप्राप्तेरादेशयोरकारोच्चारणमर्थवत्।

न चात्ववदयानावपि गौणेन तत्र विधिरिति शंक्यम्। युष्मदस्मदोरितिवत्। स्वरूपाश्रयत्वात्। संज्ञोपसर्जनप्रतिषेधस्य पाठात् पर्युदास इति गणविषयत्वात्। न चात्र त्यदादीनामित्यस्यानुवृत्तिः।

भाष्यकारादिभिरनुकृत्वादिति चेत्। एवं तर्हि इदमो म इत्यकारप्रश्लेषण त्यदाद्यत्वविषये इक परिभाषया इकारस्याकारो विधास्यते। तथा हि इदमो [54,55]. इत्यंशेन मस्य म विधाय ततः अ इति योगो विभज्य नेदम इति वर्तते। यद्यपि पूर्वत्र स्थानषष्ठी तथापीह गुणलिडो पस्थापितेक पदेन समानाधिकरण्यासम्भवादवयवायां सम्बध्यते। इदमोऽवयवस्येक् इति। न चैवं योगविभागेन विधीयमानोकारः स्त्रियामपि स्यादियमिति। अयं पुसीति वचने तु त्यादाद्यत्वस्याप्यनेनेन पुंस्येवेति नियमादिति चेत्।

न इदमो मः पुंसीति न्यासाश्रयणे नपुंस्येव साचत्वविधानात्। अत एव इदमोऽय ग्रहणस्येव पुंसीत्यस्याप्यकर्तव्यता पूर्व प्रतिज्ञाता। तेन स्त्रियां न भविष्यति न नपुंसकेऽपि सोलुंक लुप्तत्वान्नात्वप्रसड़ा तमाचष्ट इति गौणाविधवदिदिति टिलोपे चिणो लुकित्यनेन[56,57] तस्यासिद्धत्वात्पुनस्तदप्रवृत्तौ क्विपि णिलोपे तु किञ्च तत्र इति भवति तत्र सावद्यादेशेकारस्याप्यनेनात्वप्रसङ्ग एकदेशविकृतमनन्यवदित्यस्यापीदं शब्दत्वादिति। तदसत्।

अचः परस्मिन्निति णिलोपस्य स्थानिवत्वेन सुपरत्वाभावादत्वाप्रसङ्गात्। न च क्वौ लुप्तं न स्थानिवदिति निषेधः। क्वौ विधिं प्रतीति सिद्धान्तात्। कथमन्यथा लवसावक्षाणे लौरिति सिध्येत्। णावतो लोपस्य क्वावलुप्तत्वेन स्थानिवत्वाट् टो प्रसङ्गात्। ण्यन्तयोः क्विपि मान्तत्वं विद्यते युष्मदस्मदोः स्थानिवत्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यत इति भाष्यकारवचनप्रामाण्यादत्र विषये क्वचिदाश्रीयत इति स्थितमाकरे कथमन्यथा तकारस्य मत्वाभावः इदो यादे शाभावश्च सिद्धान्तेऽपि साधनीयः परेणापि। अदद्ये व साचक्षाणोददिदित्यत्रादस औत्वं च दुर्वारं स्यात्। इदगित्भ्यां इददगित्द्य इत्यत्र हलिलोपो[58] दश्चेति[59] मत्वमित्याद्यप्यचिकित्स्यं स्यात्। न च मदुक्ते अत्वे स्थानिवत्वं न भवति मत्वादौऽनुभवतीत्यत्र विनिगमकमस्ति।

यत्तूच्यते-अकारप्रश्लेषसामर्थ्यात् क्वौ लुप्तं न स्थानिवदित्याश्रयणात्स परत्वमस्तीति। तन्न। अकारप्रश्लेषस्यायमिति गौणेप्यत्वविध्यर्थत्वेन सामर्थ्यासम्भवात्। यदप्युच्यतेःअकार प्रश्लेषं प्रमाणाभावादयुक्तमेतदिति। तदप्यसत्। क्ङिति चेत्यादौ गकारादिप्रश्लेष इव व्याख्यानस्यैव प्रमाणत्वात्। नैवं वृद्धाख्यातमिति चेत्।

तानेव पृच्छामः गुणवृद्धिग्रहणमकृत्वा लाघवायैवमेव किं न व्याख्यात इति। निर्लिङ, व्याख्यानमप्रमाणमिति चेन्न। यदि गौणेत्ययमत्यनेनेत्यत्र श्रवणार्थमनयोरकारोच्चारणं स्यात्तर्हि लाघवानुरोधादिदमो मित्यनन्तरम् अ इति पृथगकारमेव विदध्यादेवं ह्यादेशयोः द्विरकारोच्चारणमित् ग्रहणं गुणवृद्धिग्रहणं च न कर्तव्यं स्यादित्युद् भाव्यमाने तर्के किं लिङप्रमाणचिन्तया। अथापि चिन्ता तदुच्यते। नात्र प्रमाणान्तरापेक्षा प्रत्यक्षमेव ह्यकार उच्चार्यते म इति न पुनर्गकारः दिवस्थादत्यन्तानुमेयः।

न च श्रुतस्य संभवति प्रयोजनेऽविवक्षानाम शक्यते वक्तुम् । तदुक्तं भाष्ये । इह हि शब्दस्य व्यर्थ उपदेशः कार्यार्थो वा श्रवणार्थो वेति। अत एव काम्य जातिषु ककारस्येत्कार्याभावे श्रवणार्थतैव कल्प्यते न पुनरविवक्षेति। तथा चोच्चारणस्य श्रवणार्थत्वमौत्सर्गिकमिति अविवक्षायां परं प्रमाणमन्वेषणीयम् । यथा मोराजी[60]त्यत्राकारविवक्षायां सम्राडिति निर्देशः अनंभिधानं चेति यथाकथञ्चिदुभाभ्यां समाधेयं न पुनरूच्चारणातिरिक्तं[61] विवक्षार्थमपि प्रमाणमनुवृत्य पाठकजातिष्वतिप्रसगात्। ननु हलि कल्पोरदन्तत्वनिपातनं ज्ञापकमन्यत्रासति प्रमाणे उच्चारणार्थत्वस्य अन्यथा हलकत्वेत्यदतोच्चारणादेवावगतेः किं निपातश्चा श्रयणेनेति चेत्।

मैवं । नात्रोच्चारणार्थता शंकया निपातनाश्रयणमपि त्वलाक्षणिकस्याप्युत्पत्या सिद्धार्थम् । इयमेव विवक्षानामपदस्य विधिविशेषत्वे तात्पर्य तच्च क्वचित्क्षणान्तरसिद्धेऽपि भवति तदेव लाक्षणिकवर्णादिविषयसप्तम्यामिति व्यपदिश्यते इतीयान् भेदः। एवं वधपिवत्योरपि नेयतान्यत्रोच्चारणार्थतां ज्ञापयितुमीष्टे। अपि च यद्यत्राकार उच्चारणार्थः स्यात् तदप्ययमिदं इत्येव वदेत्।

न चैवं सिद्धं धर्मिणमुद्दिश्येत्यादिन्यायबाधः । प्रयोजनानुरोधेन तथा दर्शनात् । यथा लोपादेशोऽस्ति व्योर्वलि । वृद्धिरादैजिति[62] । इह तु लाघवमेवास्ति प्रयोजनम् । अतोप्यवसीयते विवक्षितोऽत्राकार इति। नन्वेवं मकाराकारसमुदाय एवादेशोऽस्त्विवति चेन्न । तथा सत्यमेकाल्त्वात्सर्वादेशः स्यात् । न चैतद्युक्तं यः सौ इदोऽय पुंसीत्यादि विरोधात्। यदेव तवाकाराविवक्षयां प्रमाणं तदेव मे समुदायानादेशत्वेऽपि भविष्यति। नन्वेवं मकारोकारश्चेति उभयविधाने वाक्यभेदप्रसङ्ग इतिचेत्। न य: सावित्यादिज्ञापकात् श्रुतस्य विवक्षायां प्रमाणाभावात्प्रत्येकविधाने प्रापिते प्रमाणवतो गौरवस्य दोषत्वात् । तदुक्तं प्रमाणानि दृष्टानि कल्पानि सुबहून्यपीति।

ननु यद्येतदत्वं प्रश्लेषसामर्थ्यात्त्यदाद्यत्वाविषये भवदत्ययमिति गौणेऽपि भवति तच्चान्त्यस्य मकारस्यापि स्यात्। इक्परिभाषा प्रवृत्या तस्यापि त्यदाद्यत्वविषयत्वात्। ततश्चात्वमत्वे मस्यैव पर्यायो स्याताम् । न च मत्वमलोन्त्यस्य[63] अत्वंत्विक परिभाषायेक इति शक्यं वक्तुमेकत्वात् षष्ठयर्थस्य इदम इति सकृत् श्रुतायाः षष्ठ्यैक एवार्थः स्यात् । स्थाने योगे वा अवयवयोगो वा न द्वौ समुच्चितौनापि विकल्पितौ। यद् वेकपरिभाषोपस्थिताविकारस्यैवात्वमत्वे पर्यायेण स्यातामित्ययमिति न सिध्येदिति चेत् । आः प्रमत्तोसि पदावेवोक्तं अ इति योगो विभज्यत इति तत्र मत्वमलोन्त्यस्यैव स्थानषष्ठ्या निरपवादत्वाद् भविष्यति। अ इति तु योगेऽनुवृत्तमिदम इति गुणलिङोपस्थितेनेका समानाधिकरण्य सम्भवादवयवषष्ठ्यन्ततया विपरिणम्य सम्बध्यते। तत्र च स्थानषष्ठ्यापवादलोन्त्यस्याप्रवृत्तेरिक एवात्वमिति कुतः पर्यायशंका । अनुवर्तमाना च षष्ठी यथायथं विपरिणम्यत इत्यस्येत्यादौ सुप्रसिद्धम् ।

न च प्रश्लेषसामर्थ्या दिज्ञापकमेव बाध्ये ते ति युक्तम् । इमं चारूद्धस्याप्यत्वविधेरत्ययमित्याद्यर्थतया सामर्थ्योपक्षयात् त्यदाद्यत्वविषयेप्ययं प्रवर्तमानो यत्रेकं पश्यति तत्रैव प्रवर्तते अत्ययमिति।

तत्वन्त्यस्यापि इगवरोधाद बाधेनोपपत्ताविक परिभाषा बाधस्यान्नाप्यत्वाच्च यत् इदोऽय पुंसी[64]त्यस्यानाश्रयणे गौणेत्ययमिति भवतीत्यावेदकाभावात्तत्सिद्धये तु नान्तरकर्तृकयोगविभागो न प्रामाणिक इति न व्यभिधानं तन्न भव्यम् ।

न हि लक्षणैकचक्षुषः प्रागेव लक्ष्यस्वरूपं परिछेद्यमर्हति किन्तु यथा लक्षणसस्वरसमवयवात्कल्पयित्वा चरमं महावयवविनमनुमिमते न प्रतिपद पाठेनोपदिश्यन्ते शब्दाः। न हि तवाप्यत्ययमिति गौणे प्रयोगः प्रथममवधारणमर्हति । तथा सति लक्षणानुसरणानुसरणस्योपपत्तेः । न

च लक्षणं समुदायमुपदिशति। तथा हि प्रथमं तावत् सर्वादिगणपाठादिदम् शब्दरूपमवगच्छति। ततोऽर्थवदिति शास्त्रत्वात्प्रातिपदिकत्वम्। ततः स्वादिशास्त्र कलापपर्यालोचनयामुप्रत्ययं ततोयमादेशं ततस्त्यदाद्यत्वमपोधमत्वं ततोत्पादय इति समासं विभक्तिलोपादि ततो यणादेशादीति अवयवश एव व्युत्पाद्यते। तत्रेयानेवावयोर्विशेषः त्वयाय् इति समुदाय आदिश्यते। मयात्वकारयकारौ पृथक् न चैतावता लक्ष्यनिर्णयौ व्यवतिष्ठते।

यत्तु इद इत्यनाप्यक इत्युत्तरार्थे वक्तव्यं तदनुरोधादयादेशो विधीयते इत्यज्ञापक इति। तदपि नानाप्यक इत्यपि न्यासेनैव पदात्वे नापि सिद्धत्वात्।

न चेममतिक्रान्तेत्वान्त्यनेनेति रूपं यथा स्यादित्यनैव विधेयः अन्यथोपसर्जनत्वेनान्नाभावादतीदमेति रूपं स्यादिति वाच्यम्। अनाप्यक[65] इत्यत्राप्यकारप्रश्लेषेण पूर्ववदिष्टसिद्धेः। यद्वा इदमो म इत्ययमेवाकारो मण्डूकप्लुतिन्यायेन सम्बन्धानुवृत्या चानाप्यक इत्यत्रानुवर्तनीयः तेनात्वनेनेत्यपि सिद्धेरकारोच्चारणं लिजमेव। यत्वनादेशो गौणत्वेऽपि भवतीत्यर्थे लिङ्गं तथा हि यदि सर्वनामेन एवादेशो भवेत् तदा यः सौरैवानादेशे न भाव्यमन्यत्रापि हलि लोपेन तथा चासन्देहाय बुद्धिलाघवाय च यस्यानक इत्येव वदेत्। अनाप्यक इति वचनात्तु आश्ग्रहणे सन्देहः स्यात् किमयं यरभ्य सुपः पकारेण प्रत्याहारः किञ्चाकच यकारेणेति च।

न च विभक्त्यधिकारात्सुप एव ग्रहणमन्यस्याविभक्तेरसंभवात् इति वाच्यं प्राग्दिशीयविभक्तेःसम्भवात्। तथा च साकचिसावकाश इदम् दृशं। बाधित्वापरत्वादनकचि अनादेश: स्यात ते च बाधित्वाऽपीव्यधिकृत्योऽधीतो हलि लोपः[66] स्यात्। न च पुनः प्रसजविज्ञानादिशस्यादिति वाच्यम्। एवमपि किं व्यक्तिपक्ष उत जातिपक्ष आश्रयणीय इत्यपि संदेहतादवस्थात्।

न च किञ्च व्यवछेदे आचितिरापो ग्रहणमुत प्रत्याहारस्येति संशयः। न च विभक्त्यधिकारो नियामकः। विभक्तपरआपीति व्याख्यानात्। न च व्यवच्छेद्याभावादिह विभक्त्यनुवृत्तिरनर्थिका हलि लोप इत्युत्तरार्थत्वात्। तथा वयैस्यनक इति वक्तव्येऽनाप्यक इति वचनं तदन्त्यनेनेत्यादौ पदिषु गौणेऽपि प्रवृत्यर्थमिति। तदप्ययुक्तम्। यथा न्यासेऽर्धमात्रालाघवस्यासत्वात्। न चापग्रहणे संदेह। कृत्रिमाकृत्रिमन्यायेन प्रत्याहारस्यैवोचितत्वात्। अशब्दसंज्ञेति निषेधात्स्वंरूपमित्यपि नास्ति। विभक्त्यविशेषाच्च।

न च विभक्तिपरे आपीति व्याख्यातुमुचितं संभवति समानाधिकरण्येऽपि विध्यर्थमथवावयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीतीदमदसितिपदिकयोर्ग्रहणं मकारोकारयोस्तु वर्णयोरिति उत नेदश्चतयोः सम्बन्धिनः सो प्रथमैकवचनस्य स्थाने ऐस् भवति कुशब्दयोगे तु न भवतीति तथा नेद शब्देऽपि य इदातीतीदस्तस्य निषेधार्थनकारसमासस्य नेदशब्दस्य ग्रहणमथवान्तिकपाठयोर्नेदसाधावित्यादेशस्य नेद शब्दस्यानुकरणस्य निर्देशः यद् वा निषेधार्थनकार समासे इदम् शब्दस्य सनञश्चादसु उपक्षय इति नकारान्तस्यादप्राप्तो भिस् ऐस[67] विधीयते उत यथा श्रुतो निषेध एव विधीयत इत्याप्यनेकसंदेहानां दुर्वारत्वात् अतोऽन्त्यमिष्टतः साहचर्यव्यवस्था व्याख्येया। किञ्च अनादसोर्विशेषणाद् विभक्त्यादेशो न ग्रहीष्यते न हि तन्मात्रममिति न चादस्भ्यासङ्ख विशेष्यत इति पक्षे दोषः। तत्किं स्वरूपविशेषणमथ तदन्तविशेषणं

नाद्यः असरूपस्यास्येदमादेश एवं संभव विभक्त्यादेशे तदसम्भवात् । अथ विशेषणेन तदन्तविधेरसन्तं ग्रहीष्यत इति चेत् । न । अदस् शब्दे तदसम्भवात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति इति निषेधात्। अथ विभक्त्यादेशे नाशात्तदन्तग्रहणं इदमादेशे नाशाश्चादसा च स्वरूपग्रहणमिति। न वैरूप्यापत्तेः ।

न च ऋदुशन[68]सित्यत्र ऋता तदन्तस्यान्यैः स्वरूपस्य ग्रहणदर्शनाददोष इति वाच्यम् । उक्तं तत्र ऋमात्रस्यास्य सम्भवात् कर्तेत्यादिनिर्देशाच्च तथा श्रयणमिह तु प्रातिपदिकमप्यश सम्भवतीति निष्प्रमाणंक वैरूप्याश्रयणं किञ्च अश् इति तदन्तग्रहणं चेत्। इदमादेशो न गृह्यत अशेवायं नाशन्त इति व्यपदेशिवद्भावोऽपि प्रातिपदिकेन नास्ति । अथाधिकारे तस्य च तदुत्तरपदस्येति परिभाषया प्रातिपदिकयोङसादेशाशन्तस्य च ग्रहणेऽपि उच्यते। तदप्यसत् । ड.सादेशो ह्यश न स्वरूपेणाडं न च तन्मात्रमुत्तरपदमिति। अपि च अश् ग्रहणे प्रत्ययांशे तदन्तग्रहणं प्रकृत्यंशे स्वरूपग्रहणमिति न शक्यते वक्तुं सकृत् श्रुतस्योभयार्थत्वयोगात्। आवृत्तिकल्पने प्रमाणाभावाच्च । यदपि तवैर्ममैमिति प्रयोजनमुदाहृतं तदप्यसत्। अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्यो तेषु कर्तृषु न तदुक्तिष्विति वचनात्स्वोत्प्रेक्षितप्रयोगसिध्यर्थ लक्षणकल्पनाया अनौचित्यात्।

न चानादौ संसाने क्वचिदेतेऽपि प्रयुक्ता भविष्यन्तीति शक्यम् । तथा सति गव्यादिष्वप्यसाधुत्वेनाश्च सः स्यात् । सर्वत्रशंकापि वाच्या दुर्वारत्वात् । यद् वा इदमोत्रादेशेऽशनुदात्तस्तृतीयादाविति योऽनुदात्तोऽश्विहितः स एवेहानुकरिष्यते कथं नाशेदसोरकोरिति न्यासेऽश्ग्रहणमनुदातोपस्थिष्यामः चतसर्याधुदात्तनिपातनमितिवत्। तद् विवक्षार्थे भविष्यति। अनुदात्तादेवाशः परस्यैव न स्यादिति तेन तवैरित्यादौ ङसादेशादेशो न भविष्यति ।

न च प्रियतवैरिति बहुव्रीहौ प्रकृत्यापूर्वपदमिति कृते शेषनिघाते नायमप्यशनुदात्त इति स्यात् प्रसङ इति वाच्यम् । अशः प्रतिपदोक्तस्यैवानुदात्तस्य ग्रहणात्। दिक्समासे वह्निवत् । तदास्तामेषा काकदन्तपरीक्षा[69] । यदपि नन्वदस् ग्रहणं ज्ञापकमेव त्यदाद्यत्वमन्त्यादेश इत्यत्रेति चेन्न । त्यदादीनामित्येकस्यापि[70] षष्ठ्याविषयभेदात्। हीदमंशे इकपरिभाषाया अबाधायावयवषष्ठीत्वस्येतरांशे सोऽचि लोपे चेत्पादपूरणस्य[71,72] छन्दसि बहुलमि[73]त्यादि निर्देशानुस्थानषष्ठीत्वस्य

स्वीकारादिति न व्यभिधानम् तन्तुच्छ तथाहि अदस् शब्दे इकोऽसंभवादिकपरिभाषायाश्च प्रवृत्तेः निरपवादा त्यदादीनामिति स्थानषष्ठी अलोन्त्यात्वं करिष्यतीति[74] ने यमाशं का न चोत्तरमपि साधीयः यतस्त्यदादीनामित्स्येत्यपेक्षयावयव षष्ठीत्वे स्थानषष्ठ्यायादलोन्त्य परिभाषाया अप्रवृत्तौ ज्ञापकशतेनाप्यन्यस्यात्वालाभात् । स्थानेषष्ठी इत्यस्यानन्वयात् ।

न च ज्ञापकवशात्त्यदादिग्रहणमावृत्या स्थानावयवषष्ठीभ्यां संबध्यत इति युक्तम्। आवृत्यपेक्षयात्सूत्रसा इकपरिभाषोपस्थानकल्पने लाघवात्। किञ्च अनयापि प्रणालिकयो गे इक्परिभाषानु पस्थितिरेव ज्ञाप्यः सा तत्तत्सूत्रसामर्थ्यात्प्रथमत एव प्लुतता प्लुतस्प्रसज्यतामविशेषेण विधिनापि सर्वेष्टसिद्धेः । तस्मात्सिद्धमेतत्त्यदाद्यत्वेप्यदोष इति । एवं तर्हि उदाहरणादिगिदं स्थितः। इदं तूदाहरणं वृषाकप्यादीनामैत्वमन्त्यमात्रस्य यथा स्यादिति। नैतत्प्रयोजनम्' । वृषाकप्यग्नोस्तावदैत्वमलोन्त्यस्य भवदिक एव तत्र सत्यामपीक् परिभाषायां न दोषो न विशेषो वा । तदपवादपक्षे तर्हि दोषः वृषाकपेक्रकारस्यापि स्यादिति तन्न। उपस्थिते नेक इत्यने न समानाधिकरण्ये न

वृषाकप्याग्न्योर्विशेषणात्तदन्तविधाविगलोन्त्यपरिभाषयोः सामान्यविशेषयोरिकारे समावेशादबाधेनोपपत्तावत्यन्तबाधकल्पनाया निश्रमाणत्वात्। ऐत्वस्य ङीप्सन्नियोगशिष्टस्याव्यवहितसम्भवे व्यवहिते प्रवृत्ययोगाच्च।

पुनरन्यथा समादधुः वृषाकप्यग्न्योरिति वृषाकप्यग्नीति स्वरूपवाचिना नपुंसकलिन षष्ठीसमासे सवर्णदीर्घत्वे च ह्रस्वो नपुसंके [75,76] ति ह्रस्वत्वं एवं कुसितकुसीदयोरेव अवर्णे इति पूर्ववत् समात्सादिः ततो वृषाकप्यग्नि च कुसादे च वृषाकप्यग्निकुसीदानि तेषां सम्भवतीति प्राचोरिकारयोः वरावोश्चाकारयोः स्थानितयोह निर्देशादिक परिभाषानुपस्थितिरिति। एतेन कुसितकुसीदयोरपि प्रसङ्ग परास्तः यत्तवत्र प्रज्ञाचक्षुषां तदनुपायि उक्तम्। वृषा कपिमाचष्टे वृषा कपयति ततः णिलोपः वृषाकप तस्य स्त्री वृषाकपीति न सिध्येदिकारस्य निर्देशात्।

तच्चानिष्टं वृद्धस्तथाऽव्याख्यानादिति। तदेतदन्धस्येवान्धत्वाग्नस्यविनिपातः[77] पदे पद इति न्यायमनुहरति। यतो वृत्तिकृतोक्तं वृषाकपीत्यादि पूतक्रतौरैव मनोरौ वेति[78] त्रय एते योगाः पुंयोगादाख्यायामित्यत्र[79] द्रष्टव्य इति। पुमाख्या चासौ यस्य प्रवृत्तिनिमित्तं पुंस्येव वर्तते न स्त्रियामपि यथा गणकी प्रष्ठीति।

यदाह हरदत्तः। गणयतीति प्रतिष्ठत्व इति व्युत्पत्या पुंसि रूढा एतो न स्त्री गणयति प्रतिष्ठते वा। या तु स्वयं गणयतिष्ठते वा न तस्यां पुंयोगाच्छब्दप्रवृत्तिः अपि तर्हि स्वयमेव क्रिया सम्बन्धादिति ययैव तत्र भाव्यमिति। तथा न हि तद्धितान्तः प्रकृत्यर्थपुंसि वर्तत इतिवत्। तश्च वृषाकपशब्दोऽपि शब्दत्वान्न पुमाख्या न हि वृषाकपिमाख्यातुष्ठमाने च प्रभवति। नस्त्रीति कश्चित्प्रत्ये ति न च पकारान्तः पुसिरूढः[80] किन्त्विवदन्तः। अथाप्येकदेशविकृतन्यायात्सएवायमित्युच्यते तथापि नासौ पुंयोगास्त्रियां प्रवृत्तौऽपि तु स्वयमेव क्रिया सम्बन्धात्। तथाप्येवेन्द्रवरूण[81] सूत्रेऽनुगेव विधेय इत्युक्ता इदमाचष्टे इन्द्रयति इन्द्रयते। क्विच्णिलोपः इन्द्रः स्त्री इन्द्राणीत्यत्र दीर्घाश्रवणं प्रयोजनं हरदत्तो दूषयत्। एवमपि क्विबन्तः पुंस आख्यानभवतीति। किञ्चानुपसर्जनादित्यधिकारे जाग्रति णिनि आख्यानप्रधाने कर्तृप्रधाने उपसर्जनभूतस्य वृषाकपो कथं ङीषापाद्यते। अपि पकारस्यैत्वापादानमयुक्तं णिलोपस्य स्थानिवत्वात्।

न च क्विप्लुगिति निषेधः। क्वौ विधिं प्रतीतिसिद्धान्तात्। क्वौ लुप्तं न स्थानिवदित्यपि पक्षे योसौणौदिलोपस्तस्य स्थानिवत्वं दुर्वारमेव। अवश्यं चितदनिच्छताप्यजीकारमन्यथा वृषाकपभावात्क्षणो वृषाक् तमप्याचक्षाणो वृष इति प्रत्ययमालायां तस्य स्त्रीति विवक्षायां ककारपकारयोरप्यैत्वे क्रमाद वृद्धियणादेशयोश्च वृषायान्नापीत्यपि प्रसजत्वकेनवार्यत। न चेष्टापत्या परिहारः | प्राकुपन्यस्त प्रमाणविरोधात्। तदुक्तं तच्चानिष्टं वृद्धैः तथाऽव्याख्यानादिति। तदपि नैष स्थाणोरपराधोऽपदेन संधोन पश्यतीति न्यायेन निरस्तम्। मनोरौ वा पूतक्रतो रैवेत्यत्रापीक परिभाषोपस्थितेने का मनुपूतक्रत्वो विशेषणा दलोन्त्यस्येत्यतोकारयोरे वौत्वैत्वे भविष्यतः।

न च पूतक्रतु[82] शब्दे आदेरूकारस्यापि प्रसङ्गः। पूतक्रतीरिक इति व्यधिकरणान्वयस्य वृषाकप्यग्नो निहँपेण परास्तत्वात्। यत्र ह्यन्त इ कृत सम्भवेति तत्र किलालोन्त्यपरिभाषा वाध्यते मिदेर्गुणादौ[83] न तु तत्संभवेऽपि सार्वधातु कगुणादावपि। एते नै कारस्तु अपवादे आद्यू कारस्यापि स्यादित्यापादानमपास्तम्।

यत्तु पूतक्रतो तु पूतक्रतु स्वरूपवाचिना नपुंसकेन षष्ठीसमासे सवर्णदीर्घत्वे हस्वो नपुंसक इति ह्रस्वत्वं अनित्यमागम शासनमिति स्त्रोरितिवन्निर्देशः प्रश्लिष्टेवोकारेयुदिदिति न प्रवसत ते प्रश्लेषसामर्थ्यात् अनाप्येक इत्युपस्थानादेव द्वयोरप्युवर्णयोरैत्वस्य सिद्धेः ततश्च ह्रस्वस्यैव स्यादिति समाधाने पूतक्रतुमिवाचरति पूतक्रतू यति ततः क्विप् पूतक्रतूः एकदेशविकृतेति तस्य स्त्रीति विवक्षायां पूत क्रतायीति भवति त प्रश्लेषे न सिध्यति तस्मान्न प्रश्लेषो विज्ञातुं शक्य इति दूषणाभिधानं सोऽयमनुक्तोपालम्भः।

न ह्यत्रान्तः कोप्येवं समाधत्ते न वा भ्रान्त एवं दूषयत्यपि क्विबन्तस्य पुमाख्यात्वादुपसर्जनत्वादतो लोपस्य स्थानिवत्वात्। क्वौ विधिं प्रति न स्थानिवदिति[84] स्थितत्वात्। एवं तदाचष्ट इति णिजन्तेप्यप्रसङ्गेतिप्रसश्चोहनीयः।, अन्यथाकार प्रश्लेषवादिनोपि दीर्घोकारोऽतिप्रसो चिकित्स्य स्यात्। अणुदिति[85] सवर्णग्रहणात्। ननूक्तं प्रश्लेषसामर्थ्यादित्यादि मैवं प्रश्लिष्टेप्युकारे इक् पदोपस्थानस्य न वैयर्थ्यमुकारान्तस्य पूतक्रतोरिक इति वा इगन्तस्य पूतक्रतोऽनुकारस्येति वान्वयेनोभयोः सार्थक्यात्।

न च पूतक्रतोर्विशेषणे वैयर्थ्यमव्यभिचारदिति वाच्यम्। पूतक्रतो वदाचष्ट इति णिचि टिलोपे तान्तस्य पुनर्णौ रान्तस्य पुनर्णौ तान्तस्य च संभवात्। तस्यापि डीष्यत्वापत्तेः अथ क्विबन्तस्य पुमाख्यत्वादुपसर्जनत्वादुतोलोप स्थानिवत्वान्नतिप्रसड़-इति ब्रूयादागतोऽसि सन्मार्गे आचारक्यजन्तस्याप्यत एव न भविष्यति। तस्मात् क्विबन्तस्य पूतक्रतायीति भवतीति। ततो गर्भत्प्राणैव दूषणमप्यशुद्धम्। अयं तर्हि दोषः। रायो हलीति[86] उपस्थितो नपुंसके एव इकि ह्रस्वादेशे च पराभ्यामित्यादावेवात्वं स्यान्नतु राभ्यामित्यादाविति चेत् एवं तर्हि त्रिपदमिदमिति च षष्ठ्यर्थे प्रथमाय इति च पद प्रथमान्तनरैशब्दस्यात्वं भवति। विभक्ताविव्यर्थे पर्यवसित इक्परिभाषया इक एवेति प्राप्ते उच्यते यो हलि परे व्यवहितइगनिष्ट तस्य सर्वस्यापीत्यर्थः तेनानिको भविष्यत्यविचन भविष्यति।

न चैतदजादौ मा भूदित्येवमर्थं स्यादिति वाच्यम्। तथा सति हलीतीयता सिद्धः। अलोन्त्यस्येक[87] एव मा भूदन्त्यमात्रस्य यथा स्यादित्येवमर्थं तु तदनेनेक् परिभाषा वा बाध्यते। किञ्च युष्मदस्मदोरनादेश[88] इत्यत्राप्येतदनुवर्तते इक इत्यस्योपस्थितिं बाधितुं न युष्मदस्मदोरात्वं भवति।

कस्येत्यपेक्षाया इक्परिभाषया इक एवेति प्राप्ते यो हलीत्युपतिष्ठते तेनानादेशे हलि विभक्तौ योऽव्यवहित इगनिग्वा तस्य सर्वस्यैवेत्यर्थो भवति। तेन युष्माभिरिति दान्ते दस्य भवति। तदाचष्ट इति णिचि मान्तयोः मस्यापि भवति तथात्वामाचष्ट इति णिचिपरत्वात् "प्रत्ययोत्तर पदयोश्चेति[89]" मपर्यन्तस्य[90] चादेशेणाविष्टवदिति टिलोप प्रकृत्येकाजिति प्रकृतिभावेन वृत्त इति वृद्धयभावे सिद्धस्थत्वदयतेः क्विपि णिलोपे त्वदिति स्थिते एकदेशविकृतेति सोरमादेशे मपर्यन्ता भावात् त्वाही सावित्यस्याप्राप्तौ शेषे लोपे च त्वमिति भवति तमतिक्रान्तः अतित्वं तमाचष्टे अतित्वयति ततः क्वौणिलोपे क्वौ विधिं प्रतीतिस्थानिवत्वाभावात् शो शूडिति नुटि सिद्धाददतितू रिति प्रातिपदिकात् भ्यामादौ युष्मदस्मदोरित्यात्वामिष्यते। अतिताभ्यामतिताभिरिति तदूकारस्यापि सिध्यति। युष्माभिरित्याधुकारस्य तु न भवति हलि योऽनन्तरे वर्णः तस्येत्युक्तेः। प्राञ्चस्त्वाहुः। युष्मदो दकारो युष्मद् एकस्य दस्य संयोगान्तलोपः[91]। स चास्मद् चेति द्वन्द्वे दकारप्रश्लेषात्तस्यैवात्वं भविष्यति नेक इति।

न चैवं युष्माभ्यामतिताभ्यामित्यादौ मकारौठोख्याप्तिरिति शनीयम्। दकारेणान्त्यमात्रोपलक्षणात्।

कथमिति चेत् उच्यते- इदमाचरति इति इत्याचार क्विबन्तात्कर्तरिकृत क्विप् तेन युष्मदो यो दकारस्त त्स झोन्त्यत्वेनान्योपि वर्णे मकार तुकारो वा तस्यैव भवति अनन्त्यस्य त्विको न भवतीति निर्दिष्ट स्थानिकत्वेनेक परिभाषानुपस्थितिः सूच्यते। एवं चार्जवेनैव सत्यां गतौ तदाशयानाकलनेन स्वरीषा दोषेणान्यथा व्यर्थोत्प्रेक्ष्य दूषयन्तो निरनुयोज्यानुयोगेन निग्रहीतव्याः । एवं किंत्वालपन्ती। दकारप्रश्लेषे युषाभ्यामिति सत्यात्वं न स्यात् ।

अथ मकारोऽपि प्रश्लिष्यते संयोगान्तलोपेन तस्याश्रवणं युष्मदो म युष्मद् इति । युष्मदोद्धयोरात्वमिति वचनव्यक्तैरिति दान्तेदवत् मस्यापि स्यात् । अथवान्यां युष्मदो विशेषणे तदन्तविद्यौ दान्तस्य मान्तस्य च युष्मदौ आत्वमिति नोक्त दोष इति । तदपि न एवं हि इगुपस्थितेरप्रतिघातादिक एव स्यात् । अर्थवदेमनिर्देश सामर्थ्यादिगुपस्थानं तस्यादिति चेत् निर्देश सामर्थ्यात्प्रत्यतां समानाधिकरण्ये न सम्बन्धः । वैय्यधिकरण्येनैव सम्बन्धो भवतु । युष्मदस्मदयोरात्वमिति[92] । ततश्च एव दोषः । अथ युष्मद् चासौ युष्मद् विशेषणस्यापि इगे राजदन्तादित्वात्परत्वां द्विसंयोगान्तलोपः। येन विधिरिति तदन्त[93]विदमान्तो युष्मद् तस्य म युष्मद् । पुनर्द्विः संयोगान्तलोपः[94] स च अस्य युष्मदस्मदोरिति निर्देशः ।

तथा चायमर्थः यथा युष्मभ्यमिति दान्तस्य युष्मदो दस्य मान्तस्य च मस्यात्वमिति सिद्धं युष्माभिर्युषाभिरपि च अजितूरिति सिद्धात्प्रातिपदिकात्भ्यामि युष्मदस्मदोरात्वमिष्यते। अतिताभ्यामिति तन्न प्राप्नोति द म प्रश्लेषे तच्चानिष्टं किञ्च युष्मदस्मदोरिति सौत्रन्निर्देशानुपपत्तयभावे राजदन्तादिपाठं प्रमादत्वात्। सति प्रश्लेषे तदनुपपत्तिरिति चेत्। न प्रश्लेष एव मानाभावात् । अथ दमो विशेष्यत्वं युष्मदो विशेषणत्वं विशेषणविशेष्यभावे कामचारात्[95] । तथा च राजदन्तादिपाठाश्रयणमिति। तत्र एवं विशेषणत्वाभावात्तदन्तविधिर्न स्यात् । हयात्मकस्य युष्मदो सम्भवात् तदन्तत्वमिति चेन्न । तद्ववतोऽपि ग्रहणसंभवात् युष्माभिरित्यत्र दकारमकारवति मोरूभयोरयात्वं स्यात् । अतित्वाभ्यामित्यत्र च न स्यात् । मस्याभावात् । तस्मान्न प्रश्लेष्टुं शंक्यमिति । सोऽयमनुक्तोपालम्भः । यच्चैतद् दोषपरिजिहीर्षया केचिदूचुः। द्विलृप्तदस्य युष्मदः केवलस्य च द्वयोरेकेशेषेण निर्देशाद् वातदस्य मान्ते तु मस्यात्वं भविष्यति द्वितीयेन तु अध्रोतेन्त्यस्य भविष्यति। एकविशेषाश्रयणसामर्थ्यात् त्विक् परिभाषा नुपस्थितिरिति । तत्र कथमनुपस्थितिः यत समुच्चयार्थोऽपि हि प्रश्लेषः स्यात् । पूर्वेणाग्रस्य अपरेण तु युष्मदवयवस्येकोऽपीति। प्रत्युतापरस्य प्रश्लेषोऽनिर्दिष्ट स्थानिकत्वेनेक परिभाषोपस्थित्यर्थमेव स्यात् ।

किञ्च एकशेषपक्षे युष्मदस्मदोरिति द्विवचनानुपपत्तिः समाहारचैकशेषो नास्त्यनभिधानात् । अथ संज्ञापरिभाषादिव विवक्षाभावेप्येकशेषो द्विर्वचनेऽपीतिवत् । भाष्यानिर्दिष्ठकल्पनापराहतत्वादुपेक्षणीय एवायं पक्षः। अयं तर्हि दोषः आ सर्वनाम्नः[96] इत्यातं युष्माद्यगित्यादावेव स्यादिक्परिभाषोपस्थितेः । न भव इगित्यादौ न चैवं सनामग्रहणमनर्थकम् । विश्वज्ञदेवयोश्चेत्युत्तरार्थत्वात् । इति तच्च यावति विंदु लीवोः अधि करणे तावत्त्वे चेत्यादि निर्देशादिहे क्परिभाषा नुपस्थितेपिनादन्त्यस्येत्यनिक एवात्व विज्ञानात् ।

सन्दर्भ ग्रन्थाः -

1. 'नपुंसकस्य झलचः (अष्टा - 7.1.72)
2. मूलपाठे कलच असाधुः, झलचः साधुः ।

3. 'न ङिसम्बुद्धयोः (अष्टा – 8.2.8)

4. 'न लुमताऽस्य' (अष्टा – 1.1.63)

5. 'कर्तृकर्मणोः कृति' (अष्टा - 2.3.65)

6. मूलपाठे षध्यंतेन असाधुः, षष्ठ्यन्तेन साधुः।

7. 'दिव औत्' (अष्टा - 7.1.84)

8. मूलपाठे टुनुत्तरत्वात् असाधुः, दुरूत्तरत्वात् साधुः ।

9. मूलपाठे जोपानुपपत्तिरति असाधुः, लोपानुपपत्तिरिति साधुः ।

10. 'अलोऽन्त्यस्य' (अष्टा – 1.1.52),

11. मूलपाठे भाष्यकैपदौ असाधुः, भाष्यैकपदौ साधुः।

12. मूलपाठे तार्हि इति असाधुः, तर्हि साधुः ।

13. 'संयोगान्तस्यलोपः' (अष्टा - 8.2.23)

14. मूलपाठे तिषेधस्य असाधुः, निषेधस्य साधुः ।

15. मूलपाठे फलो कलीत्यतो असाधुः, झलो झलीत्यतो साधुः ।

16. 'झलो झलि' (अष्टा - 8.2.26)

17. मूलपाठे मुष्मदो असाधुः, युष्मदो साधुः ।

18. मूलपाठे मुष्मसु असाधुः, युष्मासु साधु।।

19. 'दाधाध्वदाप्' (अष्टा - 1.1.20)

20. 'गतिश्च' (अष्टा - 1.4,60)

21. मूलपाठे अर्थवत्पनिभाषापि असाधुः, अर्थवत्परिभाषापि साधुः ।

22. 'विपराभ्यां जेः (अष्टा – 1.3.19)

23. 'हेरचङि ' (अष्टा – 7.3.56)

24. मूलपाठे आत्महत असाधुः, आन्महत इति साधुः ।

25. 'अस्मद्युत्तमः' (अष्टा – 1.4.107)

26. 'भस्य टेर्लोपः' (अष्टा - 7.1.88)

27. 'क्विप् च' (अष्टा - 3.2.76)

28. मूलपाठे कात्विक इति असाधुः, कालिक साधुः ।

29. मूलपाठे त्वायात् इति असाधुः, न्यायात् साधुः ।

30. 'उदीचामातः स्थानेo' (अष्टा - 7.3.46)

31. 'इकोयणचि' (अष्टा – 6.1.77)

32. मूलपाठे अवीकः इति असाधुः, अचीक; साधुः ।

33. मूलपाठे पनत्वं इति असाधुः, परत्वं इति साधुः ।

34. मूलपाठे विषयपनिभाषा असाधुः, विषयपरिभाषा साधुः ।

35. 'अतोल्रान्तस्य' (अष्टा – 7.2.2)

36. मूलपाठे तद्विते इति असाधुः, तद्विते इति साधुः।

37. 'लोपः शाकल्पस्य' (अष्टा - 8.3.19)

38. 'यस्येति च' (अष्टा - 6.4.148)

39. अचोऽञ्णिीति' (अष्टा - 7.2.115)

40. 'अल्लोपोऽनः' (अष्टा - 6.4.134)

41. ‘वद व्रज हलन्तस्याचः' (अष्टा - 7.2.3)

42. मूलपाठे सिवि असाधुः, सिचि इति साधुः ।

43. मूलपाठे पपादय असाधुः, ययादय इति साधुः।

44. 'थोन्थः (अष्टा - 7.1.87)

45. मूलपाठे प्राप्तिनपि असाधुः, प्राप्तिरपि साधुः ।

46. ‘पथिमथ्यभुक्षामात्' (अष्टा - 7.1.85)

47. मूलपाठे पदाद्यत्वे इति असाधुः, त्यादाद्यत्वे इति साधुः ।

48. मूलपाठे पुतः इति असाधुः, पुरः इति साधुः।

49. रोरि' (अष्टा - 8.3.14)

50. 'मोराजी समः क्वौ' (अष्टा – 8.3.25)

51. 'यः सौः' (अष्टा - 7.2.110)

52. 'इदोऽयपुंसि’ (अष्टा - 7.2.111)

53. मूलपाठे वचमनर्थकं असाधुः, वचनमनर्थकं साधुः ।

54. मूलपाठे तिधिविषमः असाधुः, विधिनियमः साधुः ।

55. मूलपाठे इदमो भू असाधुः, इदमो म साधुः ।

56. 'इदमो मः' (अष्टा - 7.2.108)

57. मूलपाठे विणो लुकित्यनेन असाधुः, चिणो लुकित्यनेन साधुः ।

58. 'चिणो लुक (अष्टा - 6.4.104)

59. 'हलिलोपः (अष्टा - 7.2.113)

60. 'दश्च' (अष्टा - 7.2.09)

61. ‘मो राजी समः क्वौ' (अष्टा - 8.3.25)

62. मूलपाठे पुननुछारणातिरिक्तं असाधुः, पुररूच्चारणातिरिक्तं साधुः ।

63. वृद्धिरादैच् (अष्टा – 1.1.1)

64. 'अलोन्त्यस्य' (अष्टा - 1.1.52)

65. 'इदोऽय पुंसि' (अष्टा - 7.2.111)

66. 'अनाप्यकः' (अष्टा - 7.2.112)

67. हलि लोपः' (अष्टा - 7.2.113)

68. 'अतोभिस् ऐस्' (अष्टा - 7.2.9)

69. 'ऋदुशनस्पुरूदंशोऽनेहसाञ्च' (अष्टा – 7.1.94)

70. मूलपाठे पनीक्षा असाधुः, परीक्षा साधुः ।

71. मूलपाठे त्यदादीनामित्येकस्यापि असाधुः, त्यदादीनामित्येकस्यापि साधुः ।

72. मूलपाठे सोविलोपे वेत्यादपूर्णस्य असाधुः, सोऽच लोपे चेत्पादपूर्णस्य साधुः ।

73. 'सोऽचिलोपे चेत्पादपूरणम्' (अष्टा - 6.1.134)

74. मूलपाठे कनिष्यतीति असाधुः, करिष्यतीति साधुः ।

75. मूलपाठे जैतत्प्रयोजनं असाधुः, नैतत्प्रयोजनं साधुः ।

76. मूलपाठे हस्वो पुंसक असाधुः, हस्वो नपुंसक साधुः ।

77. 'ह्रस्वो नपुंसके प्रातिपादिकस्य' (अष्टा – 1.2.47)

78. मूलपाठे वितियातः असाधुः, विनिपातः साधुः ।

79. 'मनोरौ वा (अष्टा – 4.1.38)

80. मूलपाठे पुंयोगाङाख्यामित्यत्र असाधुः, पुंयोगादाख्यायामित्यत्र साधुः।।

81. मूलपाठे पुंसि नूढः इति असाधुः, पुंसिरूढः साधुः ।

82. ‘इन्द्र वरूण भवशर्व स०' (अष्टा - 1.2.49)

83. मूलपाठे पूनक्रतु असाधुः, पूतक्रतु साधुः ।

84. 'मिदेर्गुणः' (अष्टा - 7.3.82)

85. मूलपाठे स्थानिददिति असाधुः, स्थानिवदिति साधुः ।

86. 'अणुदित्सवर्णस्यचाऽप्रत्ययः' (अष्टा – 1.1.69)

87. 'रायो हलि' (अष्टा - 7.2.85)

88. 'अतोऽन्त्यस्य' (अष्टा – 1.2.52)

89. 'युष्मदस्मदोरनादेशे' (अष्टा - 7.2.85)

90. 'प्रत्ययोत्तरपदयोश्च' (अष्टा - 7.2.98)

91. मूलपाठे पपर्यन्तस्य असाधुः, मपर्यन्तस्य इति साधुः।

92. 'संयोगान्तस्य लोपः' (अष्टा - 8.2.23)

93. मूलपाठे युष्मदोदमपोरात्वमिति असाधुः, युष्मदस्मदोरात्वमिति साधुः ।

94. 'येन विधिस्तदन्तस्य' (अष्टा – 1.1.72)

95. "संयोगान्तस्य लोपः (अष्टा – 8.2.23)

96. मूलपाठे कामवारात् असाधुः, कामचारात् साधुः ।

97. 'आ सर्वनाम्नः' (अष्टा – 6.3.91)